Sarth E- Journal

Saarth E-Journal

# Saarth E-Journal of Research

E-mail : sarthejournal@gmail.com
www.sarthejournal.com

ISSN NO : 2395-339X
Peer Reviewed
Vol.8 No.18

Impact Factor
Quarterly
Jan-Feb-Mar 2023

## पुराणशब्दस्य निरूक्ति

**नाम – त्रिवेदी निकुञ्ज जयदेवभाई**

भारतीयसंस्कृतेः ज्ञानस्य प्राप्त्यर्थं पुराणानाम् अध्ययनं तु कर्तव्यमेव अस्ति। हिन्दूनां धार्मिक-इतिहासे पुराणानां महत्त्वपूर्णं स्थानमस्ति। भारतीयजनानां जीवस्य हार्दभावः पुराणेषु श्रूयमाणः अस्ति। भारतवर्षस्य धार्मिकं, सामाजिकं, ऐतिहासिकं, दार्शनिकं, राजनैतिकम् एवञ्च नानाविधप्रकारकं प्रमाणं पुराणेषु द्रष्टुं शक्यते। अतः भारतीय-आर्यसंस्कृतेः मूल्यस्य ज्ञानार्थं पुराणानाम् अध्ययनस्य आवश्यकता अस्ति।

पुराणानि आर्यजातीनां सर्वस्वानि सन्ति। तेषां गणना आर्यसाहित्यस्य सुविस्तृतस्य प्रासादस्य आधारस्तम्भरूपे, प्राचीन-इतिहासस्य प्रासादस्य सुवर्णकलशरूपे, नानाविधविज्ञानसमुद्रेषु तीर्यमाणायाः नौकायाः प्रकाशस्तम्भरूपे, मानवसमाजाय संस्कृतेः रूपे, पथप्रदर्शनकर्तुः दिव्यप्रकाशरूपे तथा आर्यजातेः अनादिकालपर्यन्तसंचितविद्यानां सुदृढकरूपे च भवति।

- **पुराणशब्दस्य व्युत्पत्तिर्निरूक्तिश्च।**

संस्कृतसाहित्ये नामानि प्रायः सार्थकान्येव संस्कृतव्याकरणमप्येतादृशमस्ति येन सर्वेषामपि शब्दानां व्युत्पत्तयः साध्यन्ते। येषां शब्दानां व्युत्पत्तयो व्याकरणेन न सिद्धयन्ति तेषां शब्दानां येन केनापि प्रकारेण निरुक्तिः क्रियते। पुराणशब्दस्य व्युत्पत्ति र्निरुक्तिश्च व्याकरण निरुक्त ग्रन्थेषूपलभ्यते। पुराणेषु पुराणशब्दस्य निरुक्तिर्या कृता सा पुराणानामर्थज्ञानाय परमोपादेया

पुराणज्ञैरङ्गीकृता। अत्र पुराणशब्दस्य व्युत्पत्तिः व्याकरणनिरुक्तग्रन्थानां सम्मतेन दीयते -

**"पुरा भवं पुराणम्"** इत्यर्थैः पुरा-इत्यव्ययशब्दात् **"सायंचिरंप्राह्वेप्रगेऽ-व्ययेभ्यष्टयुट्युलौ तुट् च"** इति सूत्रात् ट्युप्रत्ययानन्तरं इत्संज्ञकस्य टकारस्य लोपे कृते **"युवोरनाकौ"** इति सूत्रेण योरनादेशे च विहिते तुडागमाच्च 'पुरातन' इति शब्दो निष्पन्नः भवति।

किन्तु भगवता पाणिनिना **"पूर्वकालेक सर्वज रत्युपुराण नवकेवलाः समानाधिकरणे"** तथा च **"पुराणप्रोक्तेषु ब्राह्मणकल्पेषु"** सूत्रयोः पुराण शब्द प्रयोगान्नियम प्राप्ततुडागमाभावात् 'पुरान' इति शब्द **"अट्कुट्वाङ्नुम्व्यवायेऽपि"** इत्यनेन णत्वे च कृते निपातनात्पुराणशब्दस्य सिद्धिर्भवति।

पुरा-शब्दात् पुरा-अण्यते अतीतान्नर्थान्-अण्यते जीवयति इति व्युत्पत्तौ दैवादिकाद् **"अण् प्राणने"** इति धातोः **"नन्दिग्रहिपचादिभ्योल्युणिन्यचः"** इति सूत्राद् अच्-प्रत्यये कृते पुराणशब्दो निष्पद्यते।

'पुरा' अव्ययात् प्राचीनान् अतीतान् अर्थान् अणति कथयति इति व्युत्पत्तौ भौवादिकात् **"अण्"** धातोः पचादित्वाद् अचि प्रत्यये कृते 'पुराण' इति शब्दः सिद्धयति। अच् धनन्ताः शब्दाः पुंसि प्रयुज्यन्ते।

किन्तु, पुराणं पञ्चलक्षणम्। **"पुराणं ग्रन्थभेदे च क्लीबे त्रिषु पुरातने" "पुराणं षोडशपण पुराणं प्रयत्नशास्त्रयोः[1]" "पुराणं यजुषा सह"** चेत्यादिषु सन्दर्भेषु पुराणशब्दस्य नपुंसकलिङ्गे प्रयोगात्तस्य क्लीबत्वमेव। श्रीकृष्णमणित्रिपाठिना स्वकीये पुराणपर्यालोचने ग्रन्थे पुराशब्दात् **"णीनि" प्रापणे"** धातोः औणादिकेप्रत्यये कृते टिलोपाण्णत्वविधानाच्च पुराणशब्दस्य व्युत्पत्तिः कृता[2]। वैदिकशब्दानां निरुक्तिं कुर्वता यास्काचार्येण स्वकीये निरुक्तग्रन्थे पुराणशब्दस्यापि निर्वचनं कृतम्। तेन तत्र लिखितं - **"पुराणं कस्मात्, पुरा नवं भवति[3]"**।

अत्र पुरा शब्दस्य नवमित्यर्थौ विहितो यास्केन। पुराणविषयेऽस्य तात्पर्यमिदं वक्तुमुचितं यद् येषु ग्रन्थेषु प्राचीनभूतेष्वपि नवीनतायां भावोऽक्षुण्णा भवेत ते पुराणशब्देन व्यपदेश्या ग्रन्था भवन्ति।

पुराणशब्दस्यैता व्युत्पत्तयो निरुक्तिश्च पाणिनिव्याकरणानुसारं यास्काचार्योक्तानुसारं च विहिताः। पुराणशब्दस्य स्वगाम्भीर्यार्थं प्रकट्यन्त्या निरुक्तयः पुराणेष्वपि दरीदृश्यन्ते। कोशव्याकरणानुसारं तु पुराणशब्दस्यानेकेऽर्थाः प्रतिपादिताः सन्ति। परन्त्वत्र पुराणशब्देन पुरातनाख्यानयुक्ता धर्मशास्त्रप्रतिपादका महर्षिणा वेदव्यासेन निर्मिता ग्रन्थविशेषा एव सूच्यन्ते। यद्यपि धर्मशास्त्रे कालानुरुपं परिवर्तनं महर्षिभिर्विहितम् किन्तु **"अकालो नास्ति धर्मस्य"** इत्युक्त्या धर्मविषये कालस्य गणना न भवति। परिणतेऽपि काले धार्मिककर्मानुष्ठानेषु प्राचीनत्वं न सुधीभिः शङ्कितं यतो हि तदेव कर्मकाण्डमद्यावधिः समाजे प्रचलति। अत एव तत्प्रति पादकास्तदव्याकर्तारः पुराणग्रन्था अपि न प्राचीनत्त्वमुपगता नवीना इव प्रतीयन्ते। तस्मात् पुरा नवं भवति इति यास्ककृतापि पुराणस्य निरुक्तिरुचितैव।

पुराणेषु पुराणशब्दस्य निरुक्तिं वीक्ष्येदं प्रतीयते यत्पुराणस्य वर्ण्यविषयाः प्राचीना वर्तन्ते। पुराणशब्दश्रवणादेव प्राचीनतायाः स्मरणं स्वत एव जायते। येषु ग्रन्थेषु सर्वप्रतिसर्गवंश-मन्वन्तरवंशानुचरितानि पुरातनानि वर्णितानि ते पुराणशब्द वाच्यग्रन्थाः संस्कृसाहित्ये शोभन्तेतराम्। वायुपुराणे लिखितं यदद्याऽपि जीवितं प्राचीनकालेऽपि च जीवितमासीत् तत्साहित्यमेव पुराणमित्यभिधीयते –

**“यस्मात्पुरा ह्यनीतदं पुराणम् तेन तत् स्मृतम् ।**

**निरुक्तिस्य यो वेद सर्वपापैः प्रमुच्यते ।।"**

पुराणेषु प्राचीनानि आख्यानोपाख्यानानि बहुधा प्रतिपादितानि, एतस्मादेव कारणादितिहासपुराणशब्दयो बहुषु स्थलेषु सहप्रयोगो मनीषिभिर्विहितः। अतो ब्रह्माण्डपुराणं मनुते - "यत् किञ्चित् प्राचीनकालभूद्" इति तथ्यं नानाकथाभिः राज्ञां वंशकीर्तनैर्यानि प्रकटयन्ति तानि पुराणानि कथ्यन्ते। यथोक्तं ब्रह्माण्डपुराणे –

**"यस्मात्पुरा ह्यभूच्चैतत् पुराणं तेन तत्स्मृतम्।।"**

पुराणशब्दस्य निरुक्तिं कुर्वता पद्मपुराणकारेण कथितं यद् ये ग्रन्थाः पुरातनकालस्य परम्परां धर्ममर्यादां च निरुपयितुं समर्थास्ते पुराणशब्दवाच्या भवन्ति–

**"पुरा परम्परां वष्टि पुराणं तेन तत् स्मृतम् ।।"**

पुराणेषु पुरातनकल्पस्य वृत्तान्ता बहुधा वर्णिताः। प्रत्येकपुराणस्य लक्षणं कुर्वता मत्स्यपुराणेनाभिहितं यत्पुराणानि कस्यचित्कल्पस्य वृत्तान्तमधिकृत्यैव रचितानि। पुराणलक्षणानन्तरं मत्स्यपुराण इदमपि लिखितं यत्प्राचीनकल्पा-श्रितान्येव पुराणानि सन्ति

**"पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः।।"**

इत्थं पुराणस्य व्युत्पत्तिं निरुक्तिं चावधार्य विद्वद्भिः पुराणशब्दस्यायमर्थोऽ–वधारितो यत् पुरातनकाल इतस्ततः प्रचलितानां लोककथानां प्रशासकानामुदात्त-राज्ञां महर्षिणां च वंशानां भगवदवताराणां भक्तानां देवानामसुराणां चालौकिकथानां सृष्टिस्थितिप्रलयानां मन्वन्तराणां धार्मिकव्रतदानानां च वर्णनं यत्रोपलभ्यते ते पुराणाभिधेयग्रन्थाः पुरातनकल्पाश्रिता उच्यन्ते। इदमेव श्रीसुनीतिकुमारचटर्जी महोदयेन लिखितम् –

**"महर्षिर्व्यास-आर्येषु मिश्रितजातिषु च प्रचलितानां परम्पराणामाख्यानानां च सङ्ग्रहाय प्रयत्नं कृतवान्। संस्कृतभाषायां निबद्धानामासां कथानां परम्पराणां च पुराणम् इति सञ्ज्ञा बभूव। व्यासानन्तरं तस्य शिष्यप्रशिष्यैः परवर्तिपुरुषैश्च काले-काले पुराणेषु नवीनसामग्री समावेश्य तेषां विस्तारः कृतः।**

अनेन पुराणस्यार्थः स्पष्टो भवति । यद्यपि पुराणेषु यन्निहितं तदवलम्ब्य तस्यार्थः कोऽपि न कर्तुं क्षमः। यतो हि सनातनधर्मस्य तत्समाजस्य च सर्वाङ्गीणचित्रणं पुराणेषु सुष्ठु कृतम्। भारतीयविद्यानां कोशभूतानि पुराणानि भारतीयानां गौरववृद्धिकारकानि सन्ति। तस्मादेव याज्ञवल्क्यस्मृतौ चतुर्दशविद्यासु

पुराणस्य गणना कृता। पुराणैर्विना भारतीयसंस्कृतिस्तथैव न बोध्यते यथा भाष्यं विना क्लिष्टशैल्यां लिखितं शास्त्रम्।